Maharashtra Education Society's

Jr. Colleges / Higher Secondary Schools

Prelim Exam – (2019)

Std – 12th Subject – Sanskrit Date – 08.01.2019

Marks – 80 Time- 9 to 12 a.m

प्र. 1 अ) गद्यांशं पठित्वा निर्दिष्टाः कृती कुरुत।

अ 1) अवबोधनम्। (केऽपि 2 कृती कुरुत) 2

1) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

चन्दनदासस्य गृहे राक्षसेण कलत्रं न्यस्तम्। यतः ...

अ) चन्दनदासः अमात्यराक्षसस्य सुहृद्।

आ) चन्दनदासः अमात्यराक्षसस्य आप्तः।

2) संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत।

निपुणकेन राक्षसस्य अङ्गुलिमुद्रा कुतः प्राप्ता ?

3) रेखाङ्कितं पदमाधृत्य संस्कृतभाषया प्रश्ननिर्माणं कुरुत।

अपवरकात् पञ्चवर्षदेशीयः कुमारकः निर्गतः।

चाणक्यः – (आत्मगतम्) नूनं सुहृत्तमः, न हि अनात्मसदृशेषु राक्षसः कलत्रं न्यासीकरिष्यति। (प्रकाशम्) भद्र, चन्दनदासस्य गृहे राक्षसेन कलत्रं न्यासीकृतमिति कथमवगम्यते भवता ?

चरः – आर्य, इयमङ्गुलिमुद्रा आर्यमवगतार्थं करिष्यति। (इति मुद्रामर्पयति।)

चाणक्यः – (मुद्रामवलोक्य, गृहीत्वा राक्षसस्य नाम वाचयित्वा च, सहर्षं स्वगतम्) ननु वक्तव्यं – राक्षस एव अस्मदङ्गुलिप्रणयी संवृत्तः – इति। (प्रकाशम्) भद्र, अङ्गुलिमुद्राधिगमं विस्तरेण श्रोतुमिच्छामि।

चरः – शृणोत्वार्यः। अस्ति तावदहमार्येण पौरजनचरितान्वेषणे नियुक्तः। एकदा प्रविष्टोऽस्मि चन्दनदासस्य गृहम्। तत्र यमपटं प्रसार्य प्रवृत्तोऽस्मि गीतानि गातुम्। तत एकस्मादपवरकात्पञ्चवर्षदेशीयः कुमारकः

बालत्वसुलभकौतूहलाद् निष्क्रमितुं प्रवृत्तः। ततो हा निर्गत हा निर्गत इति शङ्कापरिग्रहनिवेदयिता तस्यैवापवरकस्याभ्यन्तरे स्त्रीजनस्योत्थितो महान् कलकलः। तत ईषद्द्वारदेशदापितमुखया एकया स्त्रिया स कुमारको निष्क्रामन्नेव निर्भर्त्स्यावलम्बितः कोमलया बाहुलतया। तस्याः कुमारसंरोधसंभ्रमप्रचलिताङ्गुलेः पुरुषाङ्गुलिपरिणाहप्रमाणघटिता विगलितेयमङ्गुलिमुद्रिका देहलीबन्धे पतिता, उत्थिता, तया अनवबुद्धा एव मम चरणपार्श्वं समागत्य प्रणामनिभृता कुलवधूरिव निश्चला संवृत्ता। मयापि अमात्यराक्षसस्य नामाङ्कितेत्यार्यस्य पादमूलं प्रापिता। तदेषोऽस्या आगमः।

अ 2) शब्दज्ञानम्। (केऽपि 2 कृती कुरुत) 2

1) मेलनं कुरुत।

| | |
|---|---|
| वयस्यः | मूढः |
| अपवरकः | मित्रम् |
| | कोष्ठम् |

2) गद्यांशतः विशेषणे चिनुत।

....... फलम् ..... चन्दनदासः

3) गद्यांशतः पूर्वकालवाचक-ल्यबन्ते द्वे अव्यये चिनुत।

अ 3) पृथक्करणम्। घटनाक्रमानुसारेण वाक्यसंयोजनम्। 2

1) एकया स्त्रिया कुमारकः अवलम्बितः।
2) कुमारसंरोधात् मुद्रिका पतिता।
3) कुमारकः अपवरकात् निष्क्रमितुं प्रवृत्तः।
4) चन्दनदासस्य गृहं चरः प्रविष्टः।

प्र-1 ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

ब 1) अवबोधनम्। (केऽपि 2 कृती कुरुत) 2

1) संस्कृतभाषया पूर्णवाक्येन उत्तरं लिखत।

अनेकान्तवादः कान् दोषान् उन्मूलयितुं सक्षमः ?

2) रेखाङ्कितं पदमाधृत्य संस्कृतभाषया प्रश्ननिर्माणं कुरुत।

कथनस्य अपेक्षा विविधाः सन्ति।

3) ते सर्वे सप्तभूमिकां गतवन्तः। (ते स्थाने सहचर- शब्दस्य प्रयोगं कुरुत।)

निर्भयः कुमारस्तु तस्य ग्रीवां बलेन तथा निबिडं सङ्घट्टितवान् , यथासौ क्षणादेव लोहितमुदवमत्। ततः सर्पराजः पुरुषरुपेणात्मानं प्रकाश्य पादयोर्न्यपतत् अवदच्च, बालराज ! क्षम्यताम्। सङ्गमाभिधानः सुरोऽस्म्यहम्। भवतः निर्भयत्वं परीक्षितुं फणिरुपं विधृतम्। प्रसीदतु भवान्। विस्मितः कुमारस्तम् अमुञ्चत्। सोऽपि तस्य बालकस्य महावीर इति नामकरणं कृत्वा स्वस्थानमगच्छत्।

अथैकदा सर्वे सहचरा वर्धमानस्य नन्द्यावर्तं नाम राजप्रासादं क्रीडनार्थं आजग्मुः। राजप्रासादः सप्तभूमिकः आसीत्। अतः सहचरा महानसे कार्यरतां मातरं वर्धमानस्य विषयेऽपृच्छन्। माता उवाच, अत्र नास्ति, ऊर्ध्वं पश्यत। ते सर्वे सप्तभूमिकां गतवन्तः। तत्र चिन्तनमग्नं पितरमपृच्छन् – कुत्र अस्ति वर्धमानः ? पिताऽवदत्, वर्धमानस्तु अधः एव। सर्वे सम्भ्रमिताः। अन्ते ते चतुर्थभूमिकायां स्वाध्यायरतं वर्धमानं दृष्टवन्तः। तदा एकेन बालकेनोक्तम्, वयं भृशं सम्भ्रमिताः। यतो माता वदति- उपरि पश्य, पिता चाधस्ताद् द्रष्टुं कथयति। द्वावपि मिथ्याभाषिणौ। प्रशान्तमनाः वर्धमानः प्रत्युत्तरं ददौ – अलमेतादृशैः आक्षेपवचनैः। मातुरपेक्षया उपर्यहम्, पितुरपेक्षया चाधः। अतो द्वावपि सत्यभाषिणौ। विवक्षा तु भिन्नाः।

एष एवानेकान्तवादः सापेक्षवादो वा। प्रत्येकं नानागुणात्मकं वस्तु सापेक्षम्। अनन्तकालापेक्षया वस्तु नित्यमनित्यमेकसमयापेक्षया च। एकस्यैव नाणकस्य द्वे पार्श्वे। कथनस्यापेक्षा विविधाः सन्ति, किन्तु सत्या एव भवितव्याः। गणतन्त्रस्य मूलमेवैतत्। सैव वैचारिकी अहिंसा। हिंसाचारः एकान्तवादः मनोमालिन्यम् अन्धविश्वासः आतङ्कवादश्चेति दोषान् उन्मूलयितुं सक्षमोऽनेकान्तवादः।

ब 2) शब्दज्ञानम्। (केऽपि 2 कृती कुरुत) 2

1) पर्यायशब्दौ लिखत।

सहचरः , मिथ्या

2) पूर्वपदस्य लेखनं कुरुत।

अथैकदा - ..... + एकदा

बालेनोक्तम् - ..... + उक्तम्

3) गद्यांशे आगते अनेकान्तवादस्य द्वे विशेषणे लिखत।

ब 3) पृथक्करणम्। 2

गद्यांशतः उचितान् शब्दान् चित्वा वृक्षरेखाचित्रं पूरयत।

सप्तभूमिकः राजप्रासादः

↓

नाम | कुत्र वर्तते

------------- 

पितुः चिन्तनकक्षः -----

माता -------

वर्धमानस्य स्वाध्यायकक्षः -------

प्र 1 क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

क 1)अवबोधनम्। (केऽपि 2 कृती कुरुत) 2

1) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

कविः नित्यं शुचिः स्यात्। यतः ......

अ) शुचिशीलनं हि सरस्वत्याः संवननमामनन्ति।

ब) सः काव्यक्रियायै प्रयतते।

2) रेखाङ्कितं पदमाधृत्य प्रश्ननिर्माणं कुरुत।

मित्राणि कवेः <u>सर्वभाषाविन्दि</u> भवेयुः।

2) भित्तयः सततसन्निहिताः स्युः। ( भित्तयः स्थाने तद् सर्वनाम्नः प्रयोगं कुरुत। )

गृहितविद्योपविद्यः काव्यक्रियायै प्रयतेत। अपि च नित्यं शुचिः स्यात् । त्रिधा च शौचं वाक्शौचं, मनःशौचं, कायशौचं च। प्रथमे द्वितीये शास्त्रजन्मनी तार्तीयीकं तु सनखच्छोदौ पादौ, सविलेपनमात्रं वपुः, महार्हमनुल्बणं च वासः, सकुसुमं शिर इति। सुचिशीलनं हि सरस्वत्याः संवननमामनन्ति।

स्मितपूर्वमभिभाषणं, सर्वत्रौक्तिगर्भमभिधानं सर्वतो रहस्यान्वेषणं परकाव्यदूषणवैमुख्यमनभिहितस्य, अभिहितस्य तु यथार्थमभिधानम्।

तस्य भवनं सुसम्मृष्टम्, ऋतुषट्कोचितविविधस्थानम्, अनेकतरुमूलकल्पिताश्रयवृक्षवाटिकं, सक्रीडापर्वतकं, सदीर्घिकापुष्करिणीकं, ससरित्समुद्रावर्तकं, सकुल्याप्रवाहं, सबर्हिणहरिणहारितं, ससारसचक्रवाकहंसं, सचकोरक्रौञ्चकुररशुकसारिकं, घर्मक्लान्तिचौरं, सभूमिधारागृहयन्त्रलतामण्डपकं, सदोलाप्रेङ्खं च स्यात्। काव्याभिनिवेशखिन्नस्य मनस्तापविनिर्वेदच्छेदायाज्ञामूकपरिजनं विजनं वा तस्य स्थानम्। अपभ्रंशभाषाप्रवणः परिचारकवर्गः, समागधभाषाभिनिवेशिन्यः परिचारिकाः। प्राकृतसंस्कृतभाषाविद आन्तःपुरिका, मित्राणि चास्य सर्वभाषाविन्दि भवेयुः। सदःसंस्कारविशुद्ध्यर्थं सर्वभाषारकुशलः, शीघ्रवाक्, चार्वाक्षरः, इङ्गिताकारवेदी, नानालिपिज्ञः, कविः, लाक्षणिकश्च लेखकः स्यात्।

क 2) शब्दज्ञानम्। (केऽपि 2 कृती कुरुत) 2

1) विलोमशब्दौ लिखत।

शुचिः , विजनम्

2) गद्यांशतः विशेषणे चिनुत।

------ पादौ --------- शिरः

3) उत्तरपदं लिखत।

स्मितपूर्वमभिभाषणम् – स्मितपूर्वम् + -----

यथार्थमभिधानम् – यथार्थम् + ---------

क 3) पृथक्करणम्।

मञ्जूषातः शब्दान् चित्वा कोष्ठकपूर्णं कुरुत। 2

| कविगृहे अस्ति | कविगृहे नास्ति |
|---|---|
| | |
| | |

( कौञ्चाः, गजाः, मयूराः, उष्ट्राः )

ड) माध्यमभाषया वाक्यं ससंदर्भं स्पष्टीकुरुत। ( केवलं 1 ) 5

1) कीदृशीयं विडम्बना दुर्लभस्य नरदेहस्य !

2) गवां शतसहस्रास्य हन्तुर्हरति दुष्कृतम्।

प्र 2 अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।

अ 1) अवबोधनम्। (केवलं 1) 1

1) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

राजा राज्यात् अचिरात् भ्रश्यते। यतः .....

अ) मोहात् सः स्वराष्ट्रं कर्षयति। ब) सः मोहाद् रोगग्रस्तः भवति।

बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्॥
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया।
सोऽचिरात् भ्रश्यते राज्याज्जीविताच्च सबान्धवः॥

राष्ट्रस्य सङ्ग्रहे नित्यं विधानमिदमाचरेत् ।
सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥

ब) मञ्जूषातः उचितान् शब्दान् चित्वा स्तस्भपूरणं कुरुत । 2

| निर्दाता | नृपः |
|---|---|
| | |
| | |

(राष्ट्रं रक्षति, कक्षम् उद्धरति, परिपन्थिनः हन्ति, धान्यं रक्षति)

प्र 2 ब) पद्यांशं पठित्वा निर्दिष्टाः कृती कुरुत ।

आसीत् समन्तसामन्तमस्तकन्यस्तशासनः ।
बुक्कराज इति ख्यातो राजा हरिहरानुजः ॥

यः शेष इव नागानां नगानां हिमवानिव ।
दैत्यारिरिव देवानां प्रथमः पृथिवीभुजाम् ॥

तिग्मांशोरपि तेजस्वी शीतांशोरपि शीतलः ।
सागरादपि गम्भीरः सुमेरोरपि यः स्थिरः ॥

ब 1) शब्दज्ञानम् । (केवलं 1) 1

1) समूहेतरं पदं चिनुत ।
तिग्मांशुः, सुधांशुः, चण्डांशुः, सहस्रांशुः
सागरः, उदधिः, समुद्रः, हिमवान्

ब 2) पद्यांशतः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत। 2

बुक्कराजः

- ______ शीतलः
- ______ गम्भीरः
- तेजस्वी ______
- स्थिरः ______

क) पद्यांशस्य माध्यमभाषया अनुवादं कुरुत अथवा अन्वयपूर्तिं कुरुत। 4

शशी दिवसधूसरो गलितयौवना कामिनी।
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ॥
प्रभुर्धनपरायणः सततदुर्गतिः सज्जनो।
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥

अन्वयः - ----- शशी, ----- कामिनी, विगतवारिजं -----, ----- अनक्षरं मुखं, ----- प्रभुः, सततदुर्गतिः ------, नृपाङ्गणगतः ----- मे मनसि ----- शल्यानि (सन्ति)।

ड) 'शिखरिणी' वृत्तस्य श्लोकं शुद्धं पूर्णं च लिखत। 4

इ) माध्यमभाषया ससंदर्भं स्पष्टीकुरुत। (केवलं 1) 5

1) दशाकृतिकृते कृष्णाय तुभ्यं नमः।
2) प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः।

प्र 3) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (स्थूलवाचनम्।)

युगायुगान्तरेभ्यः इदं मन्दिरं सुविख्यातम्। अकबरस्य मन्त्री अबुलफजलः स्वीये आईने-अकबरीति ग्रन्थे अलिखत् "अस्ति जगन्नाथपुर्याः समीपे सूर्यमन्दिरम्। कलिङ्गराजस्य द्वादशवर्षाणां राजस्वं तस्य निर्माणे व्ययितम्। दुष्प्रसाद्याः कलाविशारदाः अधुनापि तद् दृष्ट्वा विस्मयविमूढा भवन्ति। तस्य प्राचीराणाम् उच्चता सार्धशतहस्तमिता स्थूलता च नवदशहस्तमिता। तस्य त्रीणि द्वाराणि सन्ति। पूर्वद्वारे कारुकलया

सम्यक् उत्कीर्णे गजमूर्ती स्तः । ते शूण्डेन एकैकं मनुष्यं धरतः । पश्चिमद्वारे सकलशस्त्रास्त्रैः सुसज्जितयोः तेजस्विनो अश्वारोहिणोः मूर्ती वर्तते, उत्तरद्वारे हन्यमानगजयोः उपरि सविक्रमं स्थितयोः सिंहयोः मूर्ती स्तः।

सम्मुखे कृष्णप्रस्तरनिर्मितः अष्टकोणः पञ्चाशद्गजोच्चः स्तम्भः वर्तते । नव सोपानानि आरुह्य शिलामयं विशालायतनं द्रष्टुं शक्यते यत्र सूर्येण सह अन्यग्रहाः समुत्कीर्णाः। सप्तशतप्रायवर्षेभ्यः प्राक् नृपः नरसिंहदेवः अस्य भव्यभवनस्य निर्माणं समापयत् इति कथ्यते....."

अबुलफजलः षोडशशताब्द्याः उत्तरार्धे विवरणमिदं लिपिबद्धम् अकरोत् । यदि वयं तन्निरूपितं नरसिंहदेवस्य कालं स्वीकुर्मः तर्हि अभ्युपगन्तव्यं यत् कोणार्कनिर्मामं नवमशताब्द्यां समाप्तम् ।

अ) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत। 2

1 ) सर्यमन्दिरस्य द्वे दारे स्तः।

2) अबुलफजलमहोदस्य मतानुसारेण कोणार्कमन्दिरं नवमशताब्द्यां निर्मितमिति ।

ब) 50/60 शब्दपरिमितं माध्यमभाषया उत्तरं लिखत । 3

अबुलफजलमहोदयेन कोणार्कमन्दिरस्य विवरणं कीदृशं कृतम् ?

प्र 4) उचितं विकल्पं चित्वा पूर्णवाक्येन उत्तरत । (केवलं 6) 6

1) कृष्णशुक्लौ ..... परम्परे ।

अ) यजुर्वेदस्य ब) ऋग्वेदस्य क) सामवेदस्य

2) पुराणलक्षणानि ..... ।

अ) दश ब) अष्टादश क) पञ्च

3) व्याकरणस्य असामान्यग्रन्थस्य कर्ता ..... ।

अ) आत्रेयः ब) शाकल्यः क) पाणिनिः

4) न्यायसूत्रकर्ता ...... ।

अ) कणादः ब) कपिलः क) गौतमः

5) ...... नास्तिकदर्शनं वर्तते ।

अ) योगदर्शनम् ब) वैशिषकदर्शनम् क) चार्वाकदर्शनम्

6) नाट्यशास्त्रस्य रचयिता ..... ।

अ) कणादमुनिः    ब) भरतमुनिः    क) राजशेखरः

7) निरुक्तस्य कर्ता ..... ।

अ) शाकटायनः    ब) गार्ग्यः    क) यास्कः

8) ...... आयुर्वेदस्य अङ्गम् ।

अ) यमः    ब) नियमः    क) रसायनम्

प्र 5) यथानिर्देशं कृतीः कुरुत । 10

अ) निबन्धलेखनम् ।- 1 विषयमधिकृत्य 10 वाक्यात्मकं निबन्धं लिखत ।

1) सज्जनप्रशंसा  2) वृक्षो रक्षति रक्षितः  3) विद्याधनम्

अथवा

अ) कथापूर्तिः । मञ्जूषातः शब्दान् चित्वा कथां पुनर्लिखत ।

श्रावणमासः नाम ..... मासः । वर्षाऋतुसमये ..... वसुन्धरा जनान् ...... प्रमोदाय । श्रावणपौर्णिमा भारतवर्षे ..... सम्पद्यते । प्रायः एषः ..... उत्सवः । पर्जन्येन ..... सागरः शान्तः भवतु इत्यर्थे धीवराः अस्मिन्नेव दिने ..... नारिकेलं यच्छन्ति । अस्मिन् एव दिने रक्षाबन्धनम् अस्ति । भगिनी भ्रातृहस्ते ..... बध्नाति भ्रातरं सूचयति च पाहि माम् अस्मिन्नेवावसरे संस्कृतदिनः सम्पद्यते । दिनेऽस्मिन् ..... माहात्म्यं वर्तते । अतः एषा पौर्णिमा नारिकेल-पौर्णिमा ..... ।

(धीवराणाम्, उत्सवानां, प्रक्षुब्धः, उच्यते, आह्वयति, नारिकेलस्य, हरिता, सोत्साहं, सूत्रं, सागराय)

अथवा

अ) संस्कृतभाषया अनुवादं कुरुत ।

1) राजा गरीबांना अन्न देतो. King gives food to the poor.

2) मी रोज व्यायाम करतो. I exercise everyday

3) तू हे काम कर. You do this work.

4) हत्ती वनात रहातो. Elephant lives in the forest.

5) ते उद्यान खूप विशाल आहे. That garden is very big.

6) पक्षी आकाशात उडतात. Birds fly in the sky.

7) तू संध्याकाळी सात वाजता ये. You come in the evening at 7'O clock.

8) पोपटाचा रंग हिरवा आहे. Parrot has green colour.

9) मला आंबा खूप आवडतो. I like mango very much.

10) जसे बी तसे अंकुर. As is the seed so is the sprout.

ब) अपठितगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत। 5

अथवा

माध्यमभाषया प्रश्ननिर्माणं कृत्वा उत्तराणि अपि माध्यमभाषया लिखत।(केवलं 5)

कविश्रेष्ठ रवीन्द्रमहोदयः अवदत् 'वाल्मीकेः रामायणं भारतीयानां भावभावनानां भागीरथी एव।' सर्वासु भारतीयभाषासु रामायणं अतीव भक्त्या गीयते। रामायणे वर्णितः राजधर्मः यतिधर्मः कुलधर्मादयः सर्वेषां भारतीयानां मर्मबन्धाः सन्ति। उत्तरप्रदेशे तुलसीरामायणस्य नित्यं पठनं कोटिकोटिजनाः कुर्वन्ति। तामिलनाडुप्रान्ते कविचक्रवर्तेः कम्बरामायणमपि अतीव लोकप्रियम्। महाराष्ट्रभाषायां कविवर्येण ग.दि.माडगूलकरमहोदयेन गीतरामायणं रचितम्।

प्रश्न 6) यथानिर्देशं कृतिः कुरुत। ( केवलं 4 उपप्रश्नाः लेखनीयाः ) 12

अ) उचितान् क्रियापदान् चित्वा कोष्ठकं पूरयत। (8 पर्यायेषु 6 करणीयाः)

| भविष्यकालः | वर्तमानकालः | आज्ञार्थः | भूतकालः | परोक्षभूतकालः | विद्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

( जगाम, भवेत्, प्रहरति, अभ्रमत्, भाषस्व, प्राप्स्यामि, गत्वा,हन्तुम् )

ब) समासाधारितानि रिक्तस्थानानि पूरयत। (8 पर्यायेषु 6 करणीयाः)

| समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|
| यज्ञविधेः | .................. | षष्ठी तत्पुरुष |

| | | |
|---|---|---|
| क्षौमदुकूलानि | .क्षौमानि दुकूलानि | .................. |
| ................... | लक्षणानि जानाति इति | उपपद तत्पुरुष |
| धीरदर्शनः | धीरं दर्शनं यस्य सः | .................. |
| प्रत्यहम् | अहनि अहनि | .................. |
| बलवर्णौजसाम् | ..................... | इतरेतर द्वन्द्व |
| ............... | उपहासेन सह यथा स्यात् तथा | क्रियाविशेषण सह बहुव्रीहि |
| ................ | त्रयाणां वर्गाणां समाहारः | द्विगु |

क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। ( 4 पर्यायेषु 3 लेखनीयाः )

1) मा अभद्रं .....। (भाषते / भाषस्व/ अभाषत )

2) ..... विना किमपि न करणीयम्। ( परीक्षा / परीक्षायै / परीक्षाम् )

3) तेन अरण्ये ..... पुरतः अपि धैर्येण स्थितम्। (व्याघ्रस्य / व्याघ्रेण/ व्याघ्रात् )

4) समस्ते राज्यक्षेत्रे ..... कृते समानां व्यवहारसंहितां प्रापयितुं प्रयतेत। ( नागरिकेषु/ नागरिकाणां/ नागरिकाः)

ड) वाक्यपरिवर्तनम्। ( 4 पर्यायेषु 3 लेखनीयाः )

1. सः मित्राद् सह क्रीडनार्थं वनं जगाम। (अशुद्धिसंशोधनं कृत्वा वाक्यं पुनर्लिखत।)

2. ज्येष्ठाः राजानम् आशिषा अनुगृहीतवन्तः। ( वचनपरिवर्तनं कुरुत।)

3. मित्रे संश्रयाय प्राप्ते क्षुद्रः अपि विमुखः न भवति। (यदा-तदा प्रयुज्य वाक्यं पुनर्लिखत।)

4. कुमारः करण्डके शेते। ( कीर्ति-कर्तृस्थाने प्रयुज्य प्रयोजकरचनां कुरुत।)

क) तद्धितानि/कृदन्तानि परिचाययत। तेषाम् अर्थान् माध्यमभाषया लिखत।

1. महिमा 2. युध्यमानः 3.पौलस्त्य 4. अवहत्य